# श्रीतुलसी स्तोत्रम्

जगद्धात्रि! नमस्तुभ्यं विष्णोश्च प्रियवल्लभे ।
यतो ब्रह्मादयो देवाः सृष्टि स्थित्यन्त कारिणः ॥ १॥

नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे ।
नमो मोक्षप्रदे देवि नमः सम्पत्प्रदायिके ॥ २॥

तुलसी पातु मां नित्यं सर्वापद्भ्योऽपि सर्वदा ।
कीर्तितापि स्मृता वापि पवित्रयति मानवम् ॥ ३॥

नमामि शिरसा देवीं तुलसीं विलसत्तनुम् ।
यां दृष्ट्वा पापिनो मर्त्या मुच्यन्ते सर्व किल्बिषात् ॥ ४॥

तुलस्या रक्षितं सर्वं जग देतच्चराचरम् ।
या विनिहन्ति पापानि दृष्ट्वा वा पापिभिर्नरैः ॥ ५॥

नमस्तुलस्यतितरां यस्यै बद्धाञ्जलिं कलौ ।
कलयन्ति सुखं सर्वं स्त्रियो वैश्यास्तथाऽपरे ॥ ६॥

तुलस्या नापरं किञ्चिद्दैवतं जगतीतले ।
यथा पवित्रितो लोको विष्णु सङ्गेन वैष्णवः ॥ ७॥

तुलस्याः पल्लवं विष्णोः शिरस्यारोपितं कलौ ।
आरोपयति सर्वाणि श्रेयांसि वरमस्तके ॥ ८॥

तुलस्यां सकला देवा वसन्ति सततं यतः ।
अतस्ता मर्चयेल्लोके सर्वान् देवान् समर्चयन् ॥ ९॥

नमस्तुलसि सर्वज्ञे पुरुषोत्तम वल्लभे ।
पाहिमां सर्व पापेभ्यः सर्व सम्पत्प्रदायिके ॥ १०॥

इति स्तोत्रं पुरा गीतं पुण्डरीकेण धीमता ।
विष्णु मर्चयता नित्यं शोभनैस्तुलसीदलैः ॥ ११॥

तुलसी श्रीर्महालक्ष्मी र्विद्याविद्या यशस्विनी ।
धर्म्या धर्मानना देवी देवी देवमनःप्रिया ॥ १२॥

लक्ष्मी प्रियसखी देवी द्यौर्भूमि रचला चला ।
षोडशैतानि नामानि तुलस्याः कीर्तयन्नरः ॥ १३॥

लभते सुतरां भक्तिं अन्ते विष्णुपदं लभेत् ।
तुलसी भूर्महालक्ष्मीः पद्मिनी श्रीर्हरिप्रिया ॥ १४॥

तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे ।
नमस्ते नारद नुते नारायण मनःप्रिये ॥ १५॥

इति श्रीपुण्डरीक कृतं तुलसी स्तोत्रम् सम्पूर्णम् ॥